This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Acc-No - 118 M1028
Title - आदित्यहृदय स्तोत्र (भविष्यपुराण)
Date - 1823 A.D.
Subject - Ritual
Page - (4)

K K S U LIBRARY
RAMTEK
441106
M1028
Dist. Nagpur

(1)

श्री ॥श्रीगणेशायनमः॥अर्जुनउवाच॥ज्ञानंसर्वशास्त्राणांगुह्याद्गुह्यतरंतथा मयकृ
१ ष्णपरिज्ञातंवाङ्मयंतवगोचरं॥१॥सूर्यस्तुतिमयंन्यासंवक्तुमर्हसिमाधवः॥भ
क्त्यागच्छामिदेवेशकथयस्वप्रसादतः॥२॥सूर्यभक्तिंकरिष्यामिकथंसूर्यंप्र
पूजयेत्॥३॥श्रीभगवानुवाच॥रुद्रादिदैवतैःसर्वैःपृष्टेनकथितंमयावक्ष्येहंकर्म
विन्यासंशृणुपांडवयत्नतः॥४॥अस्माकंयत्वयापृष्टमेकचित्तोभवार्जुन॥त
दहंसंप्रवक्ष्यामिआदिमध्यावसानकं॥५॥अर्जुनउवाच॥नारायणसुरश्रे
ष्ठपृच्छामित्वांमहायशाः॥कथमादित्यमुद्यंतमुपतिष्ठेसनातनं॥६॥श्री
भगवानुवाच॥साधुपार्थमहाबाहोबुद्धिमानसिपांडव॥यन्मांपृच्छसिउपस्थानं
तत्पवित्रंविभावसोः॥७॥सर्वमंगलमांगल्यंसर्वपापप्रणाशनं॥सर्वरोगा
प्रशमनमायुर्वर्द्धनमुत्तमं॥८॥अमित्रदमनंपार्थसंग्रामेजयवर्द्धनं॥वर्द्धनं
धनपुत्राणामादित्यहृदयंशृणु॥९॥यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंश

१

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः॥ त्रिषु लोकेषु विख्यातं निःश्रेयसकरं परं ॥१०॥ देवदेवं नमस्कृत्य प्रातरुत्था
य चार्जुन विघ्नान्यनेकरूपाणि नश्यंति स्मरणादपि ॥११॥ तस्मात्सर्वप्रयत्नेन सू
र्यमाराधयेत्सदा ॥ आदित्यहृदयं पुण्यं जाप्यं ततः शृणु पांडव ॥१२॥ ॐ अस्य श्री आ
दित्यहृदयस्तोत्रस्य श्री कृष्ण भगवान् ऋषिः अनुष्टुप् छंदः श्री सूर्यनारायणो देवता हृ
रित सूर्य रथं दिवाकरं घृणिरिति बीजं ॥ ॐ नमो भगवते जितवैश्वानरजातवेदसे नमः इ
ति शक्तिः ॥ ॐ नमो भगवते आदित्याय नमः इति कीलकं ॥ मम सर्वरोगशमनार्थं
श्री सूर्यनारायणप्रीतये जपे विनियोगः ॥ ॐ अर्कं तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्य
सेत् ॥ विन्यसेन्नेत्रयोः सूर्यं कर्णयोश्च दिवाकरं ॥१३॥ नासिकायां न्यसेद्भानुं मुखे वै
भास्करं न्यसेत् ॥ पर्जन्यमोष्ठयोश्चैव तीक्ष्णं जिह्वांतरे न्यसेत् ॥१४॥ सुवर्णरेतसं कंठे
स्कंधयोस्तिग्मतेजसं ॥ बाह्वोस्तु पूषणं चैव मित्रं वै पृष्ठतो न्यसेत् ॥१५॥ वरुणं द
क्षिणे हस्ते त्वष्टारं वामतः करे ॥ हस्तावुष्णकरः पातु हृदयं पातु भानुमान् ॥१६॥ उदरे तु य
मं विद्यादादित्यं नाभिमंडले ॥ कट्यां तु विन्यसेद्धंसं रुद्रमूर्वोस्तु विन्यसेत् ॥१७॥ जान्वोः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

3

२ स्तुतोपतिं न्यसत्सविनाहंतु तं नमयो ॥ पादयोश्च विवस्वंतं गुल्फयोश्च दिवाकरं ॥ १८ ॥ बाह्योस्त
स्थं तमो ध्वंसं जगतस्यं नरेकन्सेत ॥ सर्वांगेषु सहस्रांशु दिग्विदिक्षु भयंन्यसेत ॥ १९ ॥ इति
दिग्बंध ॥ एष आदित्यविन्यासो देवानामपि दुर्लभः ॥ इमं सत्यान्यसेन्मार्थ स या
तिपरमांगतिं ॥ २० ॥ कामक्रोधकृतात्पापात्मुच्यते नात्र संशयः ॥ सर्पादिभ्यो भयं नैव स
ग्रामेषु पथिस्थिते ॥ २१ ॥ रिपुसंघट्टकालेषु तथा चौरसमागमे ॥ त्रिसं[illegible]
त्रिसंध्यं जपतो न्यासो महापातकनाशनं ॥ २२ ॥ विस्फोटकसमुत्पन्नं तीव्रज्वरसमुद्भवं
शिरोरोगं नेत्ररोगं सर्वव्याधिविनाशनं ॥ २३ ॥ कुष्ठव्याधिस्तथा दद्रू रोगांश्च विविधांस्तथा ॥ जप
तस्तस्य नश्यंति नेत्या श्रृणुतर्जुन ॥ २४ ॥ आदित्यो मंत्रसंयुक्तः आदित्यो भवनेश्वरः ॥ आ
दित्यान्नापरो देव आदित्यः परमेश्वरः ॥ २५ ॥ आदित्यमर्चये ब्रह्मा शिव आदित्यमर्चये
त्यदादित्यगतं तेजो मम तेजोस्तदर्जुन ॥ २६ ॥ आदित्यं यः स्मरेत मां प्रपत्ति न संशयः
त्रिसंध्यं जपमानस्तु स्मरेद् त्याद्योनरः ॥ २७ ॥ स न पश्यति दारिद्रं जन्मजन्मनि चार्जुन ॥ एत
त्ते कथितं पार्थ आदित्य हृदयं मया ॥ २८ ॥ इदमुत्तममादित्य हृदयं पठते नरः ॥ मुच्यते २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वपापाव्मो सूर्यलोकं स गच्छति २९ ॐ नमो भगवते तस्मै आदित्यायनमोनमः ॥ आ
दित्यः सविता सूर्यः खग पूषा गभस्तिमान् ॥ सुवर्णस्फटिको भानु स्फुरितो विश्व
तापनः ॥ ३० ॥ कृतविश्वो महातेजा सुवर्णसुप्रबोधकः ॥ हिरण्यगर्भो त्रिशिरास्त
पनो भास्करो रविः ॥ ३१ ॥ मार्तंडो गोपतिः श्रीमान् ~~कृतज्ञ~~ ॥ कृतज्ञश्च प्रतापवान् ॥
तमिस्रहा भगो हंसो नासत्यश्च तमोनुदश्च शुद्धो विरोचनः केशी सहस्रांशुर्महाप्र
भुः विवस्वान पूषणो मृत्युर्मिहिरो जामदग्निजित् ॥ ३२ ॥ धर्मरश्मिः पतंगश्च शर
ण्यो मित्रहा तपाः दुर्विज्ञेयगतिः शूरस्तेजोराशिर्महायशाः ॥ ३४ ॥ शंभुश्चित्रांगद
सौम्यो हव्यकव्यप्रदायकः ॥ अंशुमानुत्तमो देवो ऋग्यजुःसामएव च ३५ हरिदश्व
तमोदारी सप्तसप्तिर्मरीचिमान् ॥ अग्निगर्भोदितेः पुत्रः शंभुस्तिमिरनाशनः ३६
पूषा विश्वंभरो मित्रः सुवर्णः सुप्रतापवान् ॥ आतापी मंडली भास्वान् तपनो
विश्वतापनः ॥ ३७ ॥ कृतविश्वो महातेजा सर्वरत्नमयोद्भवः ॥ अक्षरश्च क्षरश्चैव
प्रभाकरदिवाकरौ ॥ ३८ ॥ चंडांशुः सारगः सौम्यो हव्यकव्यप्रदायकः ॥ अंगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ रकों

[illegible]

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ क्रौंग दीन स्तोर क्रौंग श्रांग वर्धनं ॥ ३९॥ वुधो वुधासनो वुद्धि र्वुद्धात्मा वुद्धिवर्द्धन
वृहद्भानु र्वृहद्भासो वृहद्धामा वृहस्पतिः ॥ ४०॥ शुक्ल श्च शुक्लरेताश्च श्लक्ष्णांग शुक्ले
भूषण ॥ शनिमान् शनिरूपस्त्वं शनैर्गछसि सर्वदा ॥ ४१॥ अनादि रादिरूपस्त्वमादित्योदि
ते त्यर्यमः ४२ भानुमान् भानुरूपस्त्वं स्वर्भानु र्भानु दीप्तिमान् धुम्रकेतु र्महाकेतुः
सर्वकेतुरनुत्तमः ॥ ४३॥ तिमिरावरुणः शंभु स्त्वाष्टा मार्तंड एव च नमः पूर्वाय
गिरये पश्चिमाय नमो नमः नमो त्तराय गिरये दक्षिणाय नमो नमः ॥ ४४॥ नमः प
रगवोधाय नमस्ते द्वादशात्मने नमो विश्वग वोधाय नमो भ्राजिष्णु विष्णवे
४५॥ जोतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः प्रदीप्ताय प्रगल्भाय युगांताय नमो
नमः ॥ ४६॥ नमस्ते होतृपतये पृथिवीपतये नमः ऋगवेदादि यजुर्वेद साम वेदानः
मोस्तु ते ॥ ४७॥ नमोंकार वषट्कार वषट्कार सर्वज्ञाय नमोस्तु ते नमो हाटक वर्णाय
भास्कराय नमो नमः ॥ ४८॥ जयाय जय भद्राय हरि दश्वाय ते नमः दिव्याय दिव्य रूपा
य ग्रहाणां पतये नमः ॥ ४९॥ नमस्ते लोकनाथाय भूतानां पतये नमः नमस्ते श्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२
६

॥श्री येनिस्यंनसंकुसकुलात्मने ५१ नमो वैकल्प नाशाय नमस्ते दिव्यचक्षुषे संजो

तिस्तु स्तुतिरवोचं

[illegible]

४
३

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येमिस्त्वंनमः क्रूरकुलात्मने ॥ ५१ ॥ नमोवैकल्पनाशाय नमस्तेदिव्यचक्षुषे ज्ञलं स्मीति
स्त्वंद्युतिर्ब्रह्मा त्वंविष्णुस्त्वंप्रजापतिः ॥ ५२ ॥ त्वमेववरुणोरुद्रात्मा वायुरग्निस्त्वमेवच ॥ योयना
नांसहस्रेद्वेद्वेशतेचजायने ॥ ५३ ॥ एकेननिमिषार्द्धेन क्रममाणनमोनमः ॥ अश्वतश्च नमस्त
स्यं पृष्ठतस्तुसदानमः ॥ ५४ ॥ पार्श्वतस्तु नमस्तुभ्यं नमस्तेचास्तु सर्वतः ॥ ननतिर्योजनं लक्षं
सहस्राणिशतानिच ॥ ५५ ॥ यावत्वंघटीकामात्रास्तावद्भ्रमतिभास्करः ॥ नमः सुरारिहंत्रेच
सोमसूर्याग्निचक्षुषे ॥ ५६ ॥ नमोहिरण्यायव्योमायसर्वमंत्रमयायच ॥ नमोवेदांतवेद्यायस
र्वतंत्रमयायच ॥ ५७ ॥ अरुणोमाघमासेतु सूर्योवैफाल्गुनेतथा ॥ चैत्रमासेतुवेदांगो
भानुर्वैशाखतापनः ॥ ५८ ॥ जेष्ठमासेतपेदिंद्र आषाढेतपतेरविः ॥ गभस्तिश्रावणेमासे दे
यमोभाद्रपदेतथा ॥ ५९ ॥ सुवर्णरेताश्वयुतिकार्तिकेचदिवाकरः ॥ मार्गशीर्षेतपे
न्मित्रःपौषेविष्णुःसनातनः ॥ ६० ॥ इत्येतेद्वादशादित्याःकश्यपेयाःप्रकीर्तिताः ॥ उग्र
रूपामहात्मानस्तापंतेविश्वरूपिणः ॥ ६१ ॥ धर्मार्थकाममोक्षाणां प्रवरापंहेतवेनृप
सर्वपापहरंचैव मादित्यंसंप्रपूजयेत् ॥ ६२ ॥ एकधादशधाचैवशतधाचसहस्रधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तपंति विश्वरूपेण संहरंतिसृजंतिच॥६३॥ एषविष्णुःशिवश्चैव ब्रह्माचैवप्रजापतिः
महेंद्रश्चैवकालश्च यमोवरुणएवच॥६४॥ नक्षत्रग्रहताराणामधिपोविश्वतापनः
वायुरग्निर्धनाध्यक्षो भूतकर्तास्वयंप्रभुः॥६५॥ एषदेवोहिदेवानांसर्वमाप्यायतेजगत्
एषकर्त्ताहिभूतानांसंहर्तारक्षकस्तथा॥६६॥ एषदाताचलोकाचसदेवासुरमानुषाः
एषःलोकान्लोकाश्च सप्तद्वीपाश्चसागराः॥६७॥ एषपाताललोकाश्च दैत्यदानवराक्ष
साः॥ एषधाताविधाताचबीजंक्षेत्रंपरागतिः॥६८॥ एषएवप्रजानित्यंसंवर्द्धयतिरश्मिभिः
एषयज्ञःस्वधास्वाहा ह्रीःश्रीश्चपुरुषोत्तमः॥६९॥ सर्वदेवात्मकोदेवःसूक्ष्मोव्य
क्तःसनातनः॥ ईश्वरःसर्वभूतानांपरमेष्ठीप्रजापतिः॥७०॥ क॥ कालात्मासर्वभूतात्मा
वेदात्माविश्वतोमुखः॥ जन्ममृत्युजराव्याधिसंसारभयनाशनः॥७१॥ दारिद्र्यव्यसन
ध्वंसीश्रीमान्पातुदिवाकरः॥ विकर्त्तनोविवस्वांश्चमार्तंडोभास्करोरविः॥७२॥ लो
कप्रकाशकःश्रीमान्लोकचक्षुर्ग्रहेश्वरः॥ लोकसाक्षीत्रिलोकेशःकर्ताहर्तातमिस्रा
हा॥७३॥ तपनस्तापनश्चैवशुचिःसप्ताश्ववाहनः॥ गभस्तिहस्तोब्रह्मण्यःसर्वदेवनमस्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्कृतः ॥७४॥ आयुरारोग्यमैश्वर्यं नरदेवस्यमंदिरे ॥ यस्यप्रसादात्संप्राप्तं आदित्यहृदयंजन न
पेत ॥७५॥ स्तुत्यैतैर्नामभिः प्रातः आदित्यंस्तौतिनित्यशः ॥ प्रातरुत्थायकौंतेयतस्यरोग
भयंकुतः ॥७६॥ पातकान्मुच्यते पार्थ व्याधिभ्यश्चनसंशयः ॥ एकसंध्यंद्विसंध्यंवा स
र्वपापैःप्रमुच्यते ॥७७॥ मानसंवाचकंचैव कायजंयच्च दुष्कृतं ॥ त्रिसंध्यंजपमानस्तुप
रंपचपरमंपदं ॥७८॥ यदह्निकुरुतेपापं तदह्नाप्रतिमुच्यते ॥ यद्रात्र्यांकुरुतेपापंत
द्रात्र्याप्रतिमुच्यते ॥७९॥ ददूस्फोटककुष्टानि मंडलानिविचर्चिका ॥ येचान्येदुष्टरो
त्रि० गाश्चज्वरातिसारकादयः ॥८०॥ जपमानस्यनश्यंति वेदशास्त्रार्दवारातंसंवत्सरेणमरणं
यदातस्यध्रुवंभवेत ॥८१॥ आत्रीर्षपठपतिछायामहोराजेधनंजयः ॥ प्रातःस्नान
कृतपार्थ एकाग्रकृतमानसः ॥८२॥ यस्त्विदंपठतेभक्त्या वासोनोर्महात्मनः ॥ सुवर्णि
वतिचक्षुर्नेचांधस्तुप्रजायते ॥८३॥ पुत्रवान्धनसंपन्नो जायतेचारुजस्तथा ॥ प
श्रृंश्चलभतेनिसंनचस्वर्गान्निवर्त्तते ॥८४॥ आदित्यहृदयंपुण्यं सूर्यनामविनु
षितं ॥ श्रुत्वाचनिखिलंपार्थ सर्वपापैःप्रमुच्यते ॥८५॥ अतःकिमपरंनास्तिसिद्धिका

(१०)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ मस्य पांडव ॥ ६० ॥ तं जयस्व कौंतेय ततः श्रेयो ह्यवाप्स्यसि ॥ ८८ ॥ आदित्य हृदयं पुण्यं
यः पठेत्सुसमाहितः ॥ ८९ ॥ स सद्यो मुच्यते पापात् कृतघ्नो गोघ्न एव च ॥ ९१ ॥ य इदं शृणुयान्नि
त्यं जपेद्वापि समाहितः ॥ ९२ ॥ जपतु त्रो लभते सद्यः मस्तादित्यदिने पार्थे नाभिमात्रे ज
ले स्थितः ॥ ९३ ॥ उदयाचलमारूढं भास्करं प्रणतः स्थितः ॥ जपते मानवो नित्या शृणुया
द्वापि नक्तितः ॥ ९४ ॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ ९५ ॥ भित्तु दमनं पार्थ यदा
कर्तुं समास्थितः ॥ ९६ ॥ तदा प्रतिकृतिं कृत्वा शत्रोश्चरणपांशुना ॥ आक्रम्य वामपादेन
ह्यादित्य हृदयं जपेत् ॥ ॐ हिमाली स्वाहा ॥ ॐ हिमालीटं स्वाहा ॥ ॐ निलीटं स्वाहा ॥ त्रिनि
श्च रोगी भवति ज्वरी भवति पंचभिः ॥ ९८ ॥ जपेत्सकसप्तभिः पार्थ राजसीं तनुमाविशेत्
राजसेनाभिभूतस्य विकारान् शृणु पांडव ॥ ९९ ॥ गीयते नृत्यते नग्नः स्फोटय
तं तिधावति त्रिवारं चतुरुते हसते रुंदते पुनः ॥ १०० ॥ एवं संपीड्यते पार्थ यद्यपि स्या
न्महेश्वरः ॥ किंपुनर्मनुष्य कश्चित् शौचाचारविवर्जितः ॥ १०१ ॥ पीडतस्य न संदेहो ६

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्वरो भवति दारुणः यदा चानुग्रहं तस्मै कर्तुमिच्छेच्छुभंकरं ॥ ५६ ॥ तदा सलिलमादाय ज
पेन्मंत्रमिमं बुधः ॥ ॐ नमो भगवते तस्मै आदित्याय नमो नमः ॥ ५७ ॥ जयाय जय रुद्राय द
विद्भ्राय ते नमः ॥ दिव्याय दिव्यरूपाय ग्रहाणां पतये नमः ॥ स्नापयेत्तेन मंत्रेण शुभं
भवति नान्यथा ॥ ५८ ॥ अन्यथा च भवेद्दोषो नस्पृतेनात्र संशयः ॥ स्तवं तेनैखिलं गो
प्यं पूजां चैव निबोध मे ॥ ५९ ॥ अष्टपत्रे लिखेत्पद्मं लिप्ते गोमयमंडले ॥ उपलिप्य शु
चौ देशे नियतो वाग्यतः शुचिः ॥ ६० ॥ वृत्तं वा चतुरस्रं वा मंडलं गोमयेन तु ॥ कृत्वा तत 12
ल्लिखेत्पद्ममष्टपत्रं सकर्णिकं ॥ पद्ममष्टदलं वृत्तं प्रणवादिस्थितिस्थितं ॥ मायाबी
जं दलाग्रे तु यत्र मुच्चारयेदिति ॥ पूर्वपत्रे लिखेत्सूर्यमाग्नेय्यां तु रविं न्यसेत् ॥ ६१ ॥ याम्यां
चैव विवस्वंतं नैरृत्यां तु भगं न्यसेत् ॥ वारुण्यां वरुणं विद्याद्वायव्यां मित्रमेव च ॥ ६२ ॥
आदित्यमुत्तरे पत्रे ईशान्यां विष्णुमेव च ॥ मध्ये तु भास्करं न्यस्य क्रमेणैवं तमर्चयेत्
दीर्घाः स्वरास्तु जयाभद्रा विभूतिर्विमला तथा ॥ ३ ॥ अमोघा विद्युता चैव डामध्ये श्री सर्व
मुखी ॥ अनुष्ठानं भवेत्सैव क्रमेणैव प्रपूजयेत् ॥ अतः परं प्रवक्ष्यामि सिद्धिकामस्य पां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७

उव ॥४॥ महातेजसमुद्यंतंअपद्येतकृतांजलिः ॥ ६ ॥ सकेशराणिपद्मानि करवीरा
णिपांडव ॥ तिलंतंदुलसुक्तानिकुशैर्गंधोदकेनच ॥ ७ ॥ रक्तचंदनमिश्राणि कृत्वावै
ताम्रभाजने ॥ ८ ॥ शिरसितत्पात्रं जानुभ्यांधरणीतले ॥ ९ ॥ मंत्रपूतंगुडाकेश अर्घंद
द्यात्गभस्तिने ॥ राहिसूर्यसहस्रांशोतेजोराशेजगत्पते ॥ १० ॥ साधर्घ्यंसर्ध्यंचैवदे
वमावाहयम्यहं ॥ १ ॥ आवाहनादिषोडशोपचारैःस्वागतोनवसुप्रतिष्ठितोनव
सन्निरुद्धोनवसंनिहितोनवसन्मुखोभव ॥ ५ ॥ इतिपंचमुद्राःध्येयाः ॐ किलि २
कटु केसाधनीयेस्वाहा ॥ ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रः सः सूर्यायस्वाहा ॥ ४ ॥ नमोस्तुसूर्याय
सहस्रभानवेनमोस्तुवैश्वानरजातवेदसेत्वमेवचार्घंप्रतिगृह्णन्देवाधिदे
वायनमोनमस्ते ॥ ११ ॥ नमोभगवतेतुभ्यंनमस्तेजातवेदसेदत्तमर्घंमयाभा
नोत्वंगृहाणनमोस्तुते ॥ १२ ॥ राहिसूर्यसहस्रांशोतेजोराशेजगत्पते अनुकं
पयमांभक्त्यागृहाणार्घंदिवाकर ॥ १३ ॥ ॐ नमोभगवतेसूर्याय ॐ अरुणपतेजसे ७

(13)

नमः॥ ॐ शिवाय नमः आदित्यं च शिवं विद्यात् शिवमादित्यरूपिणं। उभयोरंतरं नास्ति आ
दित्यस्य शिवस्य च १४ एतदिच्छाम्यहं श्रोतुं पुरुषो वै दिवाकरे। तत्र व्याख्या नवा धं
ते व्याधिनिश्चयं नदि १५ उदये ब्रह्मणो रूपं मध्याह्ने च महेश्वरः अस्तमाने स्व
यं विष्णुस्त्रयी मूर्तिर्दिवाकरः १६ ॐ नमो भगवते तुभ्यं विष्णवे प्रभविष्णवे॥ ॐ नमो भ
गवते जितवैश्वानर जातवेदसे १७ ममेदमर्घ्यं गृह्ण त्वं देवदेव नमोस्तु ते॥ हिमघ्नाय त
मोघ्नाय रक्षोघ्नाय नमो नमः १८ कृतघ्नाय देवाय तस्मै सूर्यात्मने नमः॥ जयो ज
यश्च विजयो जितप्राणो जितस्तमः॥ नमो जयो जितक्रोधो वाजिनः सप्त कीर्तिता॥ २०
हरितहयरथं दिवाकरं कनकमयाम्बुजरेणुपिंजरे प्रतिदिनमुदयं नवं नवं शरणमुपै
रेउ मिहिरांशुमंतं २१ अग्निशत्रुत्तयेनास्ति न च भूतं न यं क्वचित्॥ ऊर्ध्वं न यं तत्र
पार्श्वे वै स्तुयैव च २२॥ दुर्गतिं तरंते घोरं पूजां चैव जने पश्यतां॥ सिद्धिकामो न
न सिद्धिं कन्याकामस्तु कन्यकां॥ २३॥ एतत्पठन् केवलं तेयजन्ति युक्तेन चेतसा २४

(१९)

९ श्वमेधसहस्रस्य वाजपेयशतस्य च ॥२४॥ कन्याकोटिसहस्रस्य दत्तस्य फलमा
प्नुयात् ॥ तस्मादित्य हृदयं योधीते सततं नरः ॥२५॥ सर्वपापविशुद्धात्मा सूर्यलो
के महीयते ॥ नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः ॥२६॥ अत्य सोमगवा
न्विष्णुर्येन विश्वं प्रतिष्ठितं ॥ गवां शतसहस्रस्य सम्यग्दत्तेन यत्फलं ॥२७॥ तत्फलं
लभते मर्त्यः श्रद्धात्मा स्तौति यो रविं ॥ यो धीयते सूर्यहृदयं सकलं सफलं भवेत् ॥२८॥
अष्टानां ब्राह्मणानां च लेखयित्वा समर्पयेत् ॥ ब्रह्मलोके ऋषीणां च जायते मानु
षोपि वा ॥२९॥ जातिस्मरत्वमाप्नोति शुद्धात्मा नात्र संशयः ॥३०॥ अजाय लोकत्र
यपावनाय भूतात्मने गोपतये वृषाय ॥ सूर्याय सर्वप्रलयान्तकाय नमो महा
कारुणिकोत्तमाय ॥३१॥ विवस्वते ज्ञानभृतान्तरात्मने जगत्प्रदीपाय जग
द्धितैषिणे ॥ स्वयंभुवे दीप्तसहस्रचक्षुषे सुरोत्तमायामिततेजसे नमः ॥३२॥
सुरैरनेकैः परिसेविताय हिरण्यगर्भाय हिरण्मयाय महात्मने मोक्षपदाय नि ९

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं नमोस्तु ते वासरकारणाय ॥२३॥ आदित्यं पश्यते नैत्यं मां पश्यंति न संसयः ना
दित्यं पश्यते नेत्या स न पश्यति मां नरः ॥२५॥ त्रैगुण्यं च त्रयो वेदास्त्रयो लोका
स्त्रयोग्नयः त्रयाणां हि स्वयं कर्त्ता तुरीयस्त्वं नमोस्तु ते ॥२६॥ नमः स
नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्म
बि धारिणे विरंचिनारायणशंकरात्मने ॥२७॥ नमो नमस्ते जगदेकचक्षुषे भूतादि
ग मंत्रैर्विनियोगहेतवे सरोजसंभूतसरोजनाथस्थिरिधताधार जगत्त्रिमूर्त्त
ये ॥२८॥ यस्योदये नेह जगत्प्रबुध्यते प्रवर्त्तते चाखिलकर्मसिद्धये ब्रह्मेंद्रना
रायणरुद्रवंदितः स नः सदा यच्छतु मंगलं रविः ॥२९॥ नमोस्तु सूर्याय सहस्र (16)
मूर्त्तये सहस्रशाखान्वितसंभवात्मने सहस्रयोगोद्भवभागभाजिने सहस्र
संख्या ख्या युगधारिणे नमः ॥३०॥ यन्मंडलं दीप्तकरं विशालं रत्नगनं दि
व्यमनादिरूपं दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यं ॥
३१॥ यन्मंडलं देवगणैः सुपूजितं विप्रस्तुतं भावितमुक्तिकोविदं तं देवदेवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणामामिसूर्यंपुना० ॥४२॥ यन्मंडलंज्ञानमयंच गम्यं त्रैलोक्यपूज्यं त्रिगुणात्म
रूपं तं देवदेवंप्रणामामिसूर्यंपुनातुमां० ४३॥ यन्मंडलंव्याधिविनाशदक्षं य
दृग्यजुःसामसुसंप्रगीतं प्रकाशितं येन च भूर्भुवःस्वःपुना० ॥४४॥ यन्मंडलंवे
दविदोवदंति चरंत्यंत्यमत्यासुरसिद्धसंघाः यद्योगिनोयोगरतास्मरंतिपुना
० ॥४५॥ यन्मंडलंसर्वजनेषुपूजितंज्योतिश्चकुर्यादिहमर्त्यलोके यत्स
र्वपापःक्षयकारणंचपुनातुमां० ॥४६॥ यन्मंडलं विष्णुचतुर्मुखाख्यं य
दक्षरं पापहरं जनानां यत्कल्पकल्पक्षयकारणंचपुना० ॥४७॥ यन्मं ड
लंविश्वसृजंगसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भं यस्मिंजगत्संहरते
खिलंचपुना० ॥४८॥ यन्मंडलंसर्वगतस्यविष्णोरात्मापरधामविशुद्ध
सत्वंसूक्ष्मांतरैर्योगरतैःप्रसिद्धंपुना० ॥४९॥ यन्मंडलंब्रह्मविदोवदंति
गायंतियच्चारणसिद्धसंघाः यन्मंडलंविदःस्मरंतिपुना० ॥५०॥ यन्मं

(18)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१०

३ त्वं वेदविदे शीषगीतं यद्योगिनो योगपथानुगम्यं तं देवदेवं शरणं प्रपद्ये सूर्य ॥
५१ ॥ मंडलमार्कमिमं स्तुत्यं यः पठेत् सततं सूर्यं संनिधौ सर्वपाप विशुद्धात्मा सूर्य
लोके महीयते ५२ ॥ ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसि
जासनसंनिविष्टः केयूरवान् मकरकुंडलवान् किरीटी हारी हिरण्मय
वपुर्धृतः शंखचक्रः ५३ ॥ सशंखचक्रं रविमंडले स्थितं कुशेशयाक्रांतमनंत
मच्युतं भजामि सूर्यं तपनीयमूर्तिं सुरोत्तमायामिततेजसे नमः ५४ ॥ वेदवेदांग
सारीरं दिव्यदीप्तिकरं परं रक्षोघ्नं रक्तवर्णं च रक्तसंध्यानिभाकृतिं ५५ ॥
चलांतुरु हारूढं कांचनं कुसुमप्रभं सायं रक्तो महातेजो तु वमंडलमध्यगः
५६ ॥ हंससंस्थ खविश्राभ्रेत ममल्लज्वकर हृयं पद्मा हं चिंतयेद्धातु द्विभु
जं रक्तवाससं ॥ ५७ ॥ एकचक्र रथं यस्य दिव्यं कनकभूषितं स मे भवतु सु
प्रीतो पद्महस्तो दिवाकरः ॥ ५८ ॥ आदित्यं प्रथमं नाम द्वितीयं तु दिवाक

१०

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करः तृतीयं भास्करः प्रोक्तं चतुर्थं तु प्रभाकरः ॥५९॥ पंचमं तु सहस्रांशुः षष्ठं चैव
त्रिलोचनः सप्तमं हरिदश्वश्च अष्टमं च विभावसुः ॥६०॥ नवमं दिनकरः प्रोक्तं दशा-
मं द्वादशात्मकं ॥ एकादशं त्रिमूर्तिश्च द्वादशं सूर्य एव च ॥६१॥ द्वादशादित्यनामानि
प्रातः काले पठेन्नरः ॥ दुःस्वप्नं नश्यते तस्य सर्वपीडा विनश्यति ॥६२॥ दद्रुकुष्ठहरं ति २
चैव दारिद्र्यं हरते ध्रुवं सर्वतीर्थप्रदं चैव सर्वकामप्रवर्धनं ॥६३॥ यः पठेत्सा-
यं प्रातरुत्थाय भक्तियुक्तेन चेतसा सौख्यमायुस्तथारोग्यं लभते मोक्षमेव च ॥६४॥
अग्निमीले नमस्तुभ्यं ईषे त्वोर्जे स्वरूपिणे अग्निमाय आयाहि वीतये तुभ्यं नमस्ते ज्योति-
षां पते ॥६५॥ शन्नो देवी नमस्तुभ्यं जगच्चक्षुर्नमोस्तु ते पद्मासनः पद्मक-
रः पद्मगर्भसमद्युति ॥६६॥ सप्ताश्वरथसंयुक्तो द्विभुजस्यात्सदा रविः ॥६७॥
श्लोक आदित्यस्य नमस्कारं ये कुर्वंति दिने दिने जन्मांतरसहस्रेषु दारिद्र्यं नोपजाय-
ते ॥६८॥ एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः कीर्तयंति सुरश्रेष्ठं देवं
नारायणं प्रभुं ॥६९॥ एतत्ते कथितं पार्थ आदित्यहृदयं मया नानतस्य सदृशं
स्तोत्रं लोकानां पावनं परं ॥७०॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम तस्मा-

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ क्कारुण्यभावेनरक्ष रत्नाकरः ॥७२॥ इतिश्रीभविष्योत्तरपुराणेश्रीकृष्णा
र्जुनसंवादे आदित्यहृदयस्तोत्रसंपूर्णं॥ संमवत १८८० शाके १७४५ मासोत्तं॥
मासेचैत्रमासेशुक्लेकृष्णपक्षतिथ ८ मं० लिखतंब्राह्मणहिरानंदसातमांडोग्याप्या
वासिग्रामकोउग्राकमध्यपुस्तकआदित्यहृदयकोछे ॥१॥ श्रीसूर्यनारायणनमः

~~हेपुस्तक [illegible]~~

२१

(21)

K.K.S.U. LIBRARY
RAMT...
441106
MJ 028
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 11:52
,TRANSFERRED=2020/10/05 at 11:54:51
,PAGES=21
,TYPE=STD
,NAME=S0003843
,Book Name=M-1028-AADITYA HIRDAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection